# Vedavyasaproktam Dvadashanamaganapati Stotram

# वेदव्यासप्रोक्तं द्वादशनामगणपतिस्तोत्रम्

## Document Information

Text title : Vedavyasaproktam Dvadashanamaganapati Stotram

File name : vedavyAsaproktaMdvAdashanAmagaNapatistotram.itx

Category : ganesha, padmapurANa, dvAdasha, stotra

Location : doc_ganesha

Proofread by : PSA Easwaran

Description/comments : padmapurANa | sRRiShTikhaNDa | adhyAya 63/25-31||

Latest update : April 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 11, 2025

*sanskritdocuments.org*

# वेदव्यासप्रोक्तं द्वादशनामगणपतिस्तोत्रम्

व्यास उवाच ।
गणाधिप नमस्तुभ्यं सर्वविघ्नप्रशान्तिद ।
उमाऽऽनन्दप्रद प्राज्ञ त्राहि मां भवसागरात् ॥ २५॥

हरानन्दकर ध्यानज्ञानविज्ञानद प्रभो ।
विघ्नराज नमस्तुभ्यं प्रसन्नो भव सर्वदा ॥ २६॥

कृतोपवासो गणपं पूजयेद्यो नरो मुदा ।
सर्वपापविनिर्मुक्तः सुरलोके महीयते ॥ २७॥

स्तोत्रं तस्य प्रवक्ष्यामि नामद्वादशकं शुभम् ।
(अस्य श्रीमहागणपतिद्वादशनामस्तोत्रमहामन्त्रस्य व्यास ऋषिः ।
अनुष्टुप् छन्दः । भगवान् गणपतिर्देवता । श्रीमहागणपतिप्रीत्यर्थे
नामपारायणे विनियोगः ।)
ॐ नमो गणपतये मन्त्र एष उदाहृतः ॥ २८॥

गणपतिर्विघ्नराजो लम्बतुण्डो गजाननः ।
द्वैमातुरश्च हेरम्ब एकदन्तो गणाधिपः ॥ २९॥

विनायकश्चारुकर्णः पशुपालो भवात्मजः ।
द्वादशैतानि नामानि प्रातरुत्थाय यः पठेत् ॥ ३०॥

विश्वं तस्य भवेद्वश्यं न च विघ्नं भवेत्क्वचित्
महाप्रेताश्शमं यान्ति पीड्यते व्याधिभिर्न च
सर्वपापाद्विनिर्मुक्तो ह्यक्षयं स्वर्गमश्नुते ॥ ३१॥

इति श्रीपाद्मपुराणे सृष्टिखण्डे त्रिषष्टितमाध्यायान्तर्गतं
द्वादशनामगणपतिस्तोत्रं समाप्तम् ।

महागणपतिद्वादशनामस्तोत्रम्

पद्मपुराण । सृष्टिखण्ड । अध्याय ६३/२५-३१ ॥

padmapurANa . sRRiShTikhaNDa . adhyAya 63/25-31..

Proofread by PSA Easwaran

*Vedavyasaproktam Dvadashanamaganapati Stotram*
pdf was typeset on May 11, 2025

Please send corrections to *sanskrit@cheerful.com*